Institut Français de Pondichéry

Rashtriya Sanskrit Sansthan

Collection Indologie - 100.4

संस्कृतवर्षस्मृतिग्रन्थमाला - १०

# शाब्दबोधमीमांसा

# ŚĀBDABODHAMĪMĀṂSĀ

## AN INQUIRY INTO INDIAN THEORIES OF VERBAL COGNITION

धात्वाख्यातार्थविचारात्मकः चतुर्थो भागः

PART IV - ROOTS AND VERBAL DESINENCES: THEIR SIGNIFICANCE



By
N.S. RAMANUJA TATACHARYA
with the collaboration of
F. GRIMAL
and S. LAKSHMINARASIMHAM

COLLECTION INDOLOGIE 100.4
संस्कृतवर्षस्मृतिग्रन्थमाला - १०

# शाब्दबोधमीमांसा

# ŚĀBDABODHAMĪMĀṂSĀ

## An Inquiry into Indian Theories of Verbal Cognition

## धात्वाख्यातार्थविचारात्मकः चतुर्थो भागः

## Part IV - Roots and Verbal Desinences: Their Significance

*By*
**N.S. Ramanuja Tatacharya**

INSTITUT FRANÇAIS DE PONDICHÉRY
RASHTRIYA SANSKRIT SANSTHAN

# विषयसूची

## धात्वर्थविचारः (१ - ५५)

मणिग्रन्थानुसारेण धात्वर्थविचारः .................... 1
मण्डनाचार्यमतानुवादः .................... 1
तन्मतखण्डनम् .................... 2
रघुनाथशिरोमणिसंमतः धात्वर्थः .................... 3
शिरोमणिकृतं मण्डनमतखण्डनम् .................... 5
भावनाविवेकग्रन्थानुसारेण धात्वर्थविचारः .................... 6
पूर्वपक्षयुक्तीनां संकलनम् .................... 6
सिद्धान्तयुक्तीनां संकलनम् .................... 12
शब्दशक्तिप्रकाशिकानुसारं धात्वर्थविचारः .................... 17
व्युत्पत्तिवादानुसारेण धात्वर्थविचारः .................... 18
प्राच्यमतम् .................... 18
नव्यमतम् .................... 20
विभक्त्यर्थनिर्णये अनूदितं धात्वर्थविषयकं .................... 21
मण्डनमिश्रमतम् .................... 21
अस्मिन्मते आक्षेपः समाधानं च .................... 21
शाब्दिकमतानुसारेण मण्डनमिश्रमतपरिशीलनम् .................... 22
उक्तशाब्दिकमतखण्डनम्, मण्डनमतखण्डनं च .................... 23
पुनः शाब्दिकमतम् .................... 24
उक्तशाब्दिकमतखण्डनम् .................... 24
भूषणसारानुसारेण धात्वर्थनिरूपणम् .................... 25
क्रियायाः जातिरूपत्वमिति मतम् .................... 26
फलस्यापि धातुवाच्यत्वम् .................... 28
फलवत् व्यापारस्यापि धातुवाच्यत्वम् .................... 29
आख्यातस्य प्रयत्नार्थकत्वखण्डनम् .................... 30
धातोः क्रियावाचकत्वे सूत्रस्य प्रमाणता .................... 32
अस्त्यादीनामपि क्रियावाचकत्वम् .................... 33
सकर्मकत्वाकर्मकत्वनिर्वचनम् .................... 33

यदि स स्वारसिकः स्यात्। तदेव न। न हि चैत्रः पचतीत्यादिः चेतनविषयकः प्रयोग इव काष्ठं पचतीत्यादिः अचेतनविषयकः प्रयोगः स्वारसिकः।

एवमचेतने स्वरसतः कर्तृपदाप्रयोगात् कृञोऽपि यत्नत्वविशिष्टोऽर्थः। एवं चैत्र एव पचति, पाकर्ता न त्वचेतनं काष्ठादि इत्यादिप्रयोगात् लकारस्य कृञश्च यत्नत्वविशिष्टार्थकताया आवश्यकत्वात् लाघवात्तत्रैव शक्तिः, व्यापारे लक्षणेति।

## कृञः प्रवृत्तिरूपयत्नवाचकत्वम्

न च यत्नत्वस्य आख्यातावाच्यनिवृत्तिजीवनयोनियत्नसाधारणतया लकार-शक्यतावच्छेदकत्वासंभवः इति वाच्यम्। निवृत्त्यादियत्नस्य आख्यातवाच्यत्वोपगमे क्षतिविरहात्। निवृत्त्यादेः पाकानुकूलताविरहेण तत्काले पचतीति प्रयोगा-पत्तिविरहात्। धात्वर्थस्य आख्यातार्थे यत्ने न केवलं विषयत्वं संबन्धः अपि तु अनुकूलत्वमपीति निवृत्तौ धात्वर्थानुकूलत्वस्य बाधात् न तादृशप्रयोगापत्तिरिति।

वस्तुतस्तु निवृत्त्यादेः कदाप्याख्याताधीनबोधविषयत्वाभावात् न आख्यात-वाच्यत्वम्। इत्थं च इष्टसाधनताज्ञानजन्यतावच्छेदिका प्रवृत्तित्वजातिरेव आख्यातशक्यतावच्छेदिका। चैत्रो निश्वसितीत्यादौ निश्वासाश्रयत्वमेव प्रतीयते। तेन निश्वासानुकूलजीवनयोनियत्नस्य प्रवृत्तित्वानाक्रान्तत्वेऽपि न क्षतिः।

अत एवेश्वरकृतेः जन्यमात्रजनकत्वेऽपि ईश्वरः पचति ईश्वरो भुङ्क्ते इत्यादयो न प्रयोगाः। नित्यायामीश्वरकृतौ इष्टसाधनताज्ञानजन्यतावच्छेदक-प्रवृत्तित्वजातेरसत्त्वात्।

## ईश्वरो वेदं वक्तीत्यादौ यत्नार्थकत्वसमर्थनम्

न चैवम् ईश्वरो वेदं वक्ति, मथुरायां कृष्णो विहरति इत्यादिप्रयोगानुपपत्तिः, ईश्वरकृतेः आख्यातावाच्यत्वादिति वाच्यम्। अत्राख्यातस्य लक्ष्यार्थव्यापार-बोधकत्वोपगमात्। ईश्वरकृतिसाधारणयत्नत्वस्याख्यातशक्यतावच्छेदकत्वेऽपि तत्र व्यापारे लक्षणाया आवश्यकत्वात्। तथा हि आत्मा पचति शरीरं पचति इत्यादिस्वारसिकप्रयोगविरहात् आख्यातार्थकृतेः उद्देश्यतावच्छेदकशरीरविशेषा-वच्छिन्ने समवायसंबन्धेनान्वय इति नियमः स्वीकरणीयः। शरीरे अवच्छेदकता-संबन्धेन कृतेः सत्त्वेऽपि समवायसंबन्धेनासत्त्वात् आत्मशब्दोपस्थापिते निरवच्छिन्ने आत्मनि समवायसंबनधेन कृतेः सत्त्वेऽपि शरीरावच्छिन्ने तदसत्त्वाच्च नोक्तप्रयोगयोरापत्तिः। चैत्रः पचतीत्यादौ चैत्रपदस्य शरीरविशेषविशिष्टात्मपरतया शरीरविशेषरूपं यत् उद्देश्यतावच्छेदकं तदवच्छेदेन आत्मनि समवायसंबन्धेन

# ŚĀBDABODHAMĪMĀṂSĀ

## Part IV - Roots and Verbal Desinences: their Significance

Following on from the three preceding volumes which successively dealt with the sentence and its meaning (volume I), nominal desinences and nominal stems (volumes II and III), the author, in this fourth volume examines the view-points of Logic (*Nyāya*), Grammar (*Vyākaraṇa*), and Exegesis (*Pūrvamīmāṃsā*) on roots and verbal desinences. He ends the volume with his own commentary, entitled *Tarkasaṃgrahaśābdabodha*, on Annambhaṭṭa's *Tarkasaṃgraha*.

This volume completes the *Śābdabodhamīmāṃsā* (*An Enquiry on Verbal Cognition*), the work of Professor Ramanuja Tatacharya, an encyclopaedic work which examines, in 2623 pages, the different views expressed in more than 140 different ancient texts belonging to five *śāstra*-s; to the three mentioned above are added *Vedānta* and Poetics (*Alaṃkāraśāstra*).

Since retiring as Vice-Chancellor of the Rashtriya Sanskrit Vidyapeetha of Tirupati, Professor Ramanuja Tatacharya has been associated with the French Institute of Pondicherry as Honorary Professor.

Professor Tatacharya, who is well known internationally, has earned the highest awards for his profound scholarship.

ISBN: 978-81-8470-166-1